শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীশ্রীনিৱাসকৱি কৃতং

# ॥ শ্রীরামভদ্রমঙ্গলাশাসনম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামভদ্রমঙ্গলাশাসনম্ ॥

শরণাগতসন্ত্রাণনিপুণায মহাত্মনে।
অযোধ্যাজনভাগ্যায রামভদ্রায মঙ্গলম্ ॥ 1 ॥

কৌসল্যানন্দ কন্দায কল্যাণগুণসিন্ধৱে।
শরণ্যায ৱরেণ্যায রামভদ্রায মঙ্গলম্ ॥ 2 ॥

কৌশিকাখ্য মহাযোগি সন্দেশসফলীকৃতৌ।
কৃতিনে নতিতুষ্টায রামভদ্রায মঙ্গলম্ ॥ 3 ॥

ৱৈদেহীৱদনাম্ভোজ লোলম্বাযিতচেতসে।
ভদ্রাণামপি ভদ্রায রামভদ্রায মঙ্গলম্ ॥ 4 ॥

গৌতমাশ্রম সাফল্য নিদানপদপাংসৱে।
দাশকীশাদিমিত্রায রামভদ্রায মঙ্গলম্ ॥ 5 ॥

মহাপাতকনির্মুক্ত হেতুসেতুৱিধাযিনে।
শিক্ষিতাশরজালায রামভদ্রায মঙ্গলম্ ॥ 6 ॥

ৱিভীষণ পরিত্রাণ সংহৃষ্টমনসেহনিশম্।
প্রাপ্তসীতায রামায রামভদ্রায মঙ্গলম্ ॥ 7 ॥

প্রাপ্তরাজ্যায রামায ভরতাভীষ্ট দাযিনে।
সর্ৱবন্ধু সমেতায রামভদ্রায মঙ্গলম্ ॥ 8 ॥

শ্রীনিৱাস কৱীন্দ্রোক্তং সীতাৱল্লভ মঙ্গলম্।
যে পঠন্তি মহাত্মানস্তেষাং ভূযাত্তু মঙ্গলম্॥ 9॥

॥ ইতি শ্রীরামভদ্রমঙ্গলাশাসনং সমাপ্তম্॥